# Shakyasimha Stotram

# शाक्यसिंहस्तोत्रम् ३

## Document Information

Text title : Shakyasimha Stotram

File name : shAkyasiMhastotram3.itx

Category : misc, buddha, stotra

Location : doc_z_misc_general

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# शाक्यसिंहस्तोत्रम् ३

ॐ नमः शाक्यसिंहाय ।
नमस्ते शाक्यसिंहाय धर्मचक्रप्रवर्तक ।
त्रैधातुकं जगत्सर्वं शोधयेत् सर्वदुर्गतिम् ॥ १॥

नमस्ते वज्रोष्णीषाय धर्मधातुस्वभावक ।
सर्वसत्त्वहितार्थाय आत्मतत्त्वप्रदेशक ॥ २॥

नमस्ते रत्नोष्णीषाय समन्तात्तत्त्वभावनैः ।
त्रैधातुकं स्थितं सर्वमभिषेकप्रदायक ॥ ३॥

नमस्ते पद्मोष्णीषाय स्वभावप्रत्यभाषक ।
आश्वासयन्यः सत्त्वेषु धर्मामृतं प्रवर्तयेत् ॥ ४॥

नमस्ते विश्वोष्णीषाय स्वभावकृतमनुस्थित ।
विश्वकर्मकरो ह्येष सत्त्वानां दुःखशान्तये ॥ ५॥

नमस्ते तेजोष्णीषाय त्रैधातुकमभाषक ।
सर्वसत्त्व उपायेषु सत्त्वदृष्टं करिष्यते ॥ ६॥

नमस्ते ध्वजोष्णीषाय चिन्तामणिध्वजाधर ।
दानेन सर्वसत्त्वानां सर्वाशापरिपूरक ॥ ७॥

नमस्ते तृष्णोष्णीषाय क्लेशोपक्लेशछेदन ।
चतुर्मारबलं भग्नं सत्त्वानां बोधिप्राप्तये ॥ ८॥

नमस्ते छत्रोष्णीषाय आतपत्रं सुशोभनम् ।
त्रैधातुक जगत्सर्वं धर्मराजत्वप्रापकम् ॥ ९॥

लास्या माला तथा गीता नृत्या देवीचतुष्टयम् ।
पुष्पा धूपा च दीपा च गन्धादेवी नमोऽस्तु ते ॥ १०॥

द्वारमध्यस्थिता ये च अङ्कुशपाशफोटकाः ।

श्रद्धाभावविनिर्ज्ञातं द्वारपाल नमोऽस्तु ते ॥ ११॥

वेदिकादौ स्थिता ये च चतस्रो द्वारपालिकाः ।
मुदितादौ दश स्थित्वा बोधिसत्त्व नमोऽस्तु ते ॥ १२॥

ब्रह्मेन्द्ररुद्रचन्द्रार्का लोकपालाश्चतुर्दिशम् ।
अग्नी राक्षसवायुश्च भूताधिपते नमोऽस्तु ते ॥ १३॥

अनेन स्तोत्रराजेन संस्थितो मण्डलाग्रतः ।
वज्रघण्टाधरो मन्त्री इदं स्तोत्रमुदाहरेत् ॥ १४॥

इति दुर्गतिपरिशोधनोद्धृतं श्रीशाक्यसिंहस्तोत्रं सम्पूर्णम् ॥

---

*Shakyasimha Stotram*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*